# ॥ श्री देवी चण्डी कवच ॥
## Shri Devi Chandi Kavach

**॥ ॐ गण गणपतये नमः ॥**

**॥ विनियोग : ॥**

ॐ अस्य श्रीदेव्या : कवचस्य ब्रह्मा ऋषि :, अनुष्टुप् छन्द :,
ख्फ्रें चामुण्डाख्या महा-लक्ष्मी : देवता, ह्रीं ह्सौं ह्स्क्लीं ह्रीं ह्सौं
अंग-न्यस्ता देव्य : शक्तय :, ऐं ह्स्रीं ह्क्लीं श्रीं ह्वर्युं क्ष्म्रौं स्फ्रें बीजानि,
श्रीमहालक्ष्मी-प्रीतये सर्व रक्षार्थे च पाठे विनियोग :।

**॥ ऋष्यादि-न्यास : ॥**

ब्रह्मर्षये नम : शिरसि, अनुष्टुप् छन्दसे नम : मुखे, ख्फ्रें चामुण्डाख्या
महा-लक्ष्मी : देवतायै नम : हृदि, ह्रीं ह्सौं ह्स्क्लीं ह्रीं ह्सौं अंग-न्यस्ता देव्य :
शक्तिभ्यो नम : नाभौ, ऐं ह्स्रीं ह्क्लीं श्रीं ह्वर्युं क्ष्म्रौं स्फ्रें बीजेभ्यो नम : लिंगे,
श्रीमहालक्ष्मी-प्रीतये सर्व रक्षार्थे च पाठे विनियोगाय नम : सर्वांगे।

**॥ ध्यान : ॥**

ॐ रक्ताम्बरा रक्तवर्णा, रक्त-सर्वांग-भूषणा।
रक्तायुधा रक्त-नेत्रा, रक्त-केशाऽति-भीषणा।।१
रक्त-तीक्ष्ण-नखा रक्त-रसना रक्त-दन्तिका।
पतिं नारीवानुरक्ता, देवी भक्तं भजेज्जनम्।।२

वसुधेव विशाला सा, सुमेरू-युगल-स्तनी।
दीर्घौ लम्बावति-स्थूलौ, तावतीव मनोहरौ।।३
कर्कशावति-कान्तौ तौ, सर्वानन्द-पयोनिधी।
भक्तान् सम्पाययेद् देवी, सर्वकामदुघौ स्तनौ।।४

खड्गं पात्रं च मुसलं, लांगलं च बिभर्ति सा।
आख्याता रक्त-चामुण्डा, देवी योगेश्वरीति च।।५
अनया व्याप्तमखिलं, जगत् स्थावर-जंगमम्।

इमां य : पूजयेद् भक्तो, स व्याप्नोति चराचरम्।।६

**॥ मार्कण्डेय उवाच ॥**

ॐॐॐ यद् गुह्यं परमं लोके, सर्व-रक्षा-करं नृणाम्।
यन्न कस्यचिदाख्यातं, तन्मे ब्रूहि पितामह।।१

**॥ ब्रह्मोवाच ॥**

ॐ अस्ति गुह्य-तमं विप्र सर्व-भूतोपकारकम्।
देव्यास्तु कवचं पुण्यं, तच्छृणुष्व महामुने।।२
प्रथमं शैल-पुत्रीति, द्वितीयं ब्रह्म-चारिणी।
तृतीयं चण्ड-घण्टेति, कूष्माण्डेति चतुर्थकम्।।३

पंचमं स्कन्द-मातेति, षष्ठं कात्यायनी तथा।
सप्तमं काल-रात्रीति, महागौरीति चाष्टमम्।।४
नवमं सिद्धि-दात्रीति, नवदुर्गाः प्रकीर्त्तिता :।
उक्तान्येतानि नामानि, ब्रह्मणैव महात्मना।।५

अग्निना दह्य-मानास्तु, शत्रु-मध्य-गता रणे।
विषमे दुर्गमे वाऽपि, भयार्ताः शरणं गता।।६
न तेषां जायते किंचिदशुभं रण-संकटे।
आपदं न च पश्यन्ति, शोक-दु :ख-भयं नहि।।७

यैस्तु भक्त्या स्मृता नित्यं, तेषां वृद्धि : प्रजायते।
प्रेत संस्था तु चामुण्डा, वाराही महिषासना।।८
ऐन्द्री गज-समारूढ़ा, वैष्णवी गरूड़ासना।
नारसिंही महा-वीर्या, शिव-दूती महाबला।।९

माहेश्वरी वृषारूढ़ा, कौमारी शिखि-वाहना।
ब्राह्मी हंस-समारूढ़ा, सर्वाभरण-भूषिता।।१०
लक्ष्मी : पद्मासना देवी, पद्म-हस्ता हरिप्रिया।
श्वेत-रूप-धरा देवी, ईश्वरी वृष वाहना।।११

इत्येता मातर : सर्वा:, सर्व-योग-समन्विता।
नानाभरण-षोभाढया, नाना-रत्नोप-शोभिता :।।१२
श्रेष्ठैष्च मौक्तिकै : सर्वा, दिव्य-हार-प्रलम्बिभि :।
इन्द्र-नीलैर्महा-नीलै, पद्म-रागै : सुशोभने :।।१३

दृष्यन्ते रथमारूढा, देव्य : क्रोध-समाकुला :।
शंखं चक्रं गदां शक्तिं, हलं च मूषलायुधम्।।1१४
खेटकं तोमरं चैव, परशुं पाशमेव च।
कुन्तायुधं च खड्गं च, शार्गांयुधमनुत्तमम्।।१५

दैत्यानां देह नाशाय, भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं, देवानां च हिताय वै।।१६
नमस्तेऽस्तु महारौद्रे !महाघोर पराक्रमे !महाबले !
महोत्साहे !महाभय विनाशिनि।।१७

त्राहि मां देवि दुष्प्रेक्ष्ये !शत्रूणां भयविर्द्धनि !
प्राच्यां रक्षतु मामैन्द्री, आग्नेय्यामग्नि देवता।।१८
दक्षिणे चैव वाराही, नैॠत्यां खड्गधारिणी।
प्रतीच्यां वारूणी रक्षेद्, वायव्यां वायुदेवता।।१९

उदीच्यां दिशि कौबेरी, ऐशान्यां शूल-धारिणी।
ऊर्ध्वं ब्राह्मी च मां रक्षेदधस्ताद् वैष्णवी तथा।।२०
एवं दश दिशो रक्षेच्चामुण्डा शव-वाहना।
जया मामग्रत : पातु, विजया पातु पृष्ठत :।।२१

अजिता वाम पार्श्वे तु, दक्षिणे चापराजिता।
शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता।।२२
मालाधरी ललाटे च, भ्रुवोर्मध्ये यशस्विनी।
नेत्रायोश्चित्र-नेत्रा च, यमघण्टा तु पार्श्वके।।२३

शंखिनी चक्षुषोर्मध्ये, श्रोत्रयोर्द्वार-वासिनी।

कपोलौ कालिका रक्षेत्, कर्ण-मूले च शंकरी।।२४
नासिकायां सुगन्धा च, उत्तरौष्ठे च चर्चिका।
अधरे चामृत-कला, जिह्वायां च सरस्वती।।२५

दन्तान् रक्षतु कौमारी, कण्ठ-मध्ये तु चण्डिका।
घण्टिकां चित्र-घण्टा च, महामाया च तालुके।।२६
कामाख्यां चिबुकं रक्षेद्, वाचं मे सर्व-मंगला।
ग्रीवायां भद्रकाली च, पृष्ठ-वंशे धनुर्द्धरी।।२७

नील-ग्रीवा बहि :-कण्ठे, नलिकां नल-कूबरी।
स्कन्धयो : खड्गिनी रक्षेद्, बाहू मे वज्र-धारिणी।।२८
हस्तयोर्दण्डिनी रक्षेदिम्बका चांगुलीषु च।
नखान् सुरेश्वरी रक्षेत्, कुक्षौ रक्षेन्नरेश्वरी।।२९

स्तनौ रक्षेन्महादेवी, मन :-शोक-विनाशिनी।
हृदये ललिता देवी, उदरे शूल-धारिणी।।३०
नाभौ च कामिनी रक्षेद्, गुह्यं गुह्येश्वरी तथा।
मेढ्रं रक्षतु दुर्गन्धा, पायुं मे गुह्य-वासिनी।।३१

कटयां भगवती रक्षेदूरू मे घन-वासिनी।
जंगे महाबला रक्षेज्जानू माधव नायिका।।३२
गुल्फयोर्नारसिंही च, पाद-पृष्ठे च कौशिकी।
पादांगुली : श्रीधरी च, तलं पाताल-वासिनी।।३३

नखान् दंष्ट्रा कराली च, केशांश्वोर्ध्व-केशिनी।
रोम-कूपानि कौमारी, त्वचं योगेश्वरी तथा।।३४
रक्तं मांसं वसां मज्जामस्थि मेदश्च पार्वती।
अन्त्राणि काल-रात्रि च, पितं च मुकुटेश्वरी।।३५

पद्मावती पद्म-कोषे, कक्षे चूडा-मणिस्तथा।
ज्वाला-मुखी नख-ज्वालामभेद्या सर्व-सन्धिषु।।३६

शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा।
अहंकारं मनो बुद्धिं, रक्षेन्मे धर्म-धारिणी।।३७

प्राणापानौ तथा व्यानमुदानं च समानकम्।
वज्र-हस्ता तु मे रक्षेत्, प्राणान् कल्याण-शोभना।।३८
रसे रूपे च गन्धे च, शब्दे स्पर्शे च योगिनी।
सत्वं रजस्तमश्चैव, रक्षेन्नारायणी सदा।।३९

आयू रक्षतु वाराही, धर्मं रक्षन्तु मातर :।
यश : कीर्तिं च लक्ष्मीं च, सदा रक्षतु वैष्णवी।।४०
गोत्रमिन्द्राणी मे रक्षेत्, पशून् रक्षेच्च चण्डिका।
पुत्रान् रक्षेन्महा-लक्ष्मीर्भार्यां रक्षतु भैरवी।।४१

धनं धनेश्वरी रक्षेत्, कौमारी कन्यकां तथा।
पन्थानं सुपथा रक्षेन्मार्गं क्षेमंकरी तथा।।४२
राजद्वारे महा-लक्ष्मी, विजया सर्वत : स्थिता।
रक्षेन्मे सर्व-गात्राणि, दुर्गा दुर्गाप-हारिणी।।४३

रक्षा-हीनं तु यत् स्थानं, वर्जितं कवचेन च।
सर्वं रक्षतु मे देवी, जयन्ती पाप-नाशिनी।।४४

**॥ फल-श्रुति ॥**

सर्वरक्षाकरं पुण्यं, कवचं सर्वदा जपेत्।
इदं रहस्यं विप्रर्षे !भक्त्या तव मयोदितम्।।४५
देव्यास्तु कवचेनैवमरक्षित-तनु : सुधी :।
पदमेकं न गच्छेत् तु, यदीच्छेच्छुभमात्मन :।।४६

कवचेनावृतो नित्यं, यत्र यत्रैव गच्छति।
तत्र तत्रार्थ-लाभ : स्याद्, विजय : सार्व-कालिक :।।४७
यं यं चिन्तयते कामं, तं तं प्राप्नोति निश्चितम्।
परमैश्वर्यमतुलं प्राप्नोत्यविकल : पुमान्।।४८

निर्भयो जायते मर्त्य:, संग्रामेष्वपराजित :।
त्रैलोक्ये च भवेत् पूज्य :, कवचेनावृत : पुमान्।।४९
इदं तु देव्या : कवचं, देवानामपि दुर्लभम्।
य : पठेत् प्रयतो नित्यं, त्रि-सन्ध्यं श्रद्धयान्वित :।।५०

देवी वश्या भवेत् तस्य, त्रैलोक्ये चापराजित :।
जीवेद् वर्ष-शतं साग्रमप-मृत्यु-विवर्जित :।।५१
नश्यन्ति व्याधय : सर्वे, लूता-विस्फोटकादय :।
स्थावरं जंगमं वापि, कृत्रिमं वापि यद् विषम्।।५२

अभिचाराणि सर्वाणि, मन्त्र-यन्त्राणि भू-तले।
भूचरा : खेचराश्चैव, कुलजाश्चोपदेशजा :।।५३
सहजा : कुलिका नागा, डाकिनी शाकिनी तथा।
अन्तरीक्ष-चरा घोरा, डाकिन्यश्च महा-रवा :।।५४

ग्रह-भूत-पिशाचाश्च, यक्ष-गन्धर्व-राक्षसा :।
ब्रह्म-राक्षस-वेताला :, कूष्माण्डा भैरवादय :।।५५
नष्यन्ति दर्शनात् तस्य, कवचेनावृता हि य :।
मानोन्नतिर्भवेद् राज्ञस्तेजो-वृद्धि : परा भवेत्।।५६

यशो-वृद्धिर्भवेद् पुंसां, कीर्ति-वृद्धिश्च जायते।
तस्माज्जपेत् सदा भक्तया, कवचं कामदं मुने।।५७
जपेत् सप्तशतीं चण्डीं, कृत्वा तु कवचं पुर :।
निर्विघ्नेन भवेत् सिद्धिश्चण्डी-जप-समुद्भवा।।५८

यावद् भू-मण्डलं धत्ते !स-शैल-वन-काननम्।
तावत् तिष्ठति मेदिन्यां, जप-कर्तुर्हि सन्तति :।।५९
देहान्ते परमं स्थानं, यत् सुरैरपि दुर्लभम्।
सम्प्राप्नोति मनुष्योऽसौ, महा-माया-प्रसादत :।।६०

तत्र गच्छति भक्तोऽसौ, पुनरागमनं न हि।

लभते परमं स्थानं, शिवेन सह मोदते ॐॐॐ ।।६१

**॥ श्री देवी चण्डी कवचम् सम्पूर्णाम ॥**